पुनः प्रतिसम्बद्धमपि द्विरभिधीयते तत् पुनरुक्त-दोषाधिकं तच्च पुनरुक्तं द्विविधं, अर्थपुनरुक्तं शब्दपुनरुक्तञ्च । तत्रार्थपुनरुक्तं नाम यथा,— "भेषजमौषधं साधनम्" इति, शब्दपुनरुक्तं "पुनर्भेषजं भेषजम्" इति चरकः ॥)

आधित्तः, त्रि, (आधि + त्रा + क ।) बद्धः । थ-पितः । इत्यजयपालः ॥

आधिदैविकं, त्रि, (अधि + देव + ठञ् । यक्ष-प्रतिकादीनां च इत्युभयपदवृद्धिः।) दुःखविशेषः । तद्यथा, । "आधिदैविकं यक्षराक्षसविनायकग्र-हाद्यावेशनिबन्धनं" । इति साङ्ख्यतत्त्वकौमुदी ॥ (देवतामधिकृत्य,प्रवृत्तं,दाहशीतादिजनितं दुःखं । अतिवातातिवृष्ट्यादिहेतुकं दुःखं । देवतामधि-कृत्य प्रवृत्तं शास्त्रम् । यथा मनुः ६ । ८३ ।

"अधियज्ञं ब्रह्म जपेदाधिदैविकमेव च ।

आध्यात्मिकञ्च सततं वेदान्ताभिहितञ्च यत्" ॥

"तत्तु सप्तविधे व्याधावुपनिपतति" इति सुश्रुतः।)

आधिपत्यं, क्ली, (अधिपति + ष्यञ् ।) अधिपते-र्भावः । स्वामित्वं । प्रभुत्वं । ऐश्वर्य्यं । यथा,

"नहि प्रपश्यामि ममापनुद्यात्

यच्छोकमुच्छोषणमिन्द्रियाणां ।

अवाप्य भूमावसपत्नमृद्धं

राज्यं सुराणामपि चाधिपत्यं" ॥

इति श्रीभगवद्गीतायां २ अध्यायः ८ ॥

(यथा मनुः १२ । १०० ।

"सर्व्वलोकाधिपत्यञ्च वेदशास्त्रविदर्हति" ।)

आधिभोगः, पुं, (आधेर्बन्धकस्य भोगः ।) बन्धक-द्रव्यस्य भोगः ॥

आधिभौतिकं, त्रि, (अधिभूत + ठञ् । अनुशति-कादीनां चेत्युभयपदवृद्धिः।) दुःखविशेषः । यथा । "वाह्योपायसाध्यं दुःखं द्वेधा । आधिभौतिकं आ-धिदैविकञ्च । तत्राधिभौतिकं मानुषपशुमृगप-क्षिसरीसृपस्थावरनिमित्तं" । इति साङ्ख्यतत्त्व-कौमुदी । ("तत्तु सप्तविधे व्याधावुपनिपतति" । इति सुश्रुतः ॥)

आधिमन्यवः, पुं, (आधि + मन्यु + अण् ।) ज्वराग्निः । इति हारावली ॥

आधिवेदनिकं, त्रि, (अधि + विद् + ल्युट् । ततः अधिवेदन + ठञ् ।) द्वितीयविवाहार्थं प्रथमस्त्रियै दत्तधनादि । यथा,—

"अधिविन्नस्त्रियै देयमाधिवेदनिकं समं ।

न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितं" ॥

इति याज्ञवल्क्यः ॥

आधुतः, त्रि, (आङ् + धु + क्तः ।) आधूतः । कम्पितः । इत्यमरटीकायां रायमुकुटः ॥

आधुनिकः, त्रि, (अधुना + ठञ् ।) अधुनाजातः । नव्यः ॥

आधूतः, त्रि, (आङ् + धू + क्त ।) कम्पितः । इत्य-मरः ॥ (विक्षिप्तः, अभिभूतः, व्याकुलितः । आन्दोलितः, चालितः । यथा, रघुवंशे, १ । ३८ । "पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः" ।)

आधेयं, त्रि, (आङ् + धा + यत् ।) आधारस्थित-वस्तु । यथा । शाब्दबोधे चैकपदार्थे अपरपदार्थ-संसर्गः संसर्गमर्य्यादया भासते । स च क्वचिद्भेदः क्वचिदतिरिक्त एवाधाराधेयप्रतियोग्यनुयोगिवि-षयविषयिभावादिः । इति गदाधरभट्टाचार्य्यकृत-प्रथमव्युत्पत्तिवादः ॥ उत्पाद्यः । यथा,—

"सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते ।

आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः" ॥

इति वोपदेवकृतमुग्धबोधीयकारिका ॥ आधेय उत्पाद्यः । यथा पक्वमृन्मयपात्रेषु रक्ततागुणः स वह्निसंयोगादिना निष्पाद्यते । इति तट्टीकायां दुर्गादासः ॥

आधोरणः, पुं, (आधोरयति धोरृगतिचातुर्य्ये कर्त्तरि ल्यु ।) हस्तिपकः । माहुत इति भाषा । ("आधोरणा हस्तिपका हस्त्यारोहा निषा-दिनः" । अमरः । यथा,—रघुवंशे ७ । ४६ ।

"आधोरणानां गजसन्निपाते

शिरांसि चक्रैर्निशितैः क्षुराग्रैः" ॥)

आध्मातः, पुं, (आङ् + ध्मा + क्तः ।) शब्दितः । दग्धः । वातरोगविशेषः । संयतः । इति मेदिनी ॥ (स्फीतः दर्पादिना उद्धतः, विवर्द्धितः । यदुक्तं । "ततो मानाध्मातः स पतति यदा शोकगहने" । हितो-पदेशे । "ततोऽसौ दर्पाध्मातस्तस्योपरि आत्मानं निक्षिप्य पञ्चत्वं गतः" । उत्तरचरिते । "ज्यानि-र्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन्" ।)

आध्मानं, क्ली, (आङ् + ध्मा + ल्युट् ।) वातव्याधि-विशेषः । तस्य रूपं ।

"साटोपमत्युग्ररुजमाध्मातमुदरं भृशं ।

आध्मानमिति जानीयाद्घोरं वातनिरोधजं" ॥

इति निदानं ॥ पेटफाँपा इति भाषा ।

तस्य चिकित्सा यथा,—

"आध्माने लङ्घनं पूर्व्वं दीपनं पाचनं ततः ।

फलवर्त्तिक्रियां कुर्य्यात् वस्तिकर्म्म च शोधनं ॥

कर्षमात्रा भवेत् क्वाथा त्रिवृता स्यात् पलोन्मिता ।

खण्डादपि पलं ग्राह्यं चूर्णमेकत्र कारयेत् ॥

मधुनाद्यमितं लिह्यात् चूर्णमाध्माननाशनं" ॥

नारायणचूर्णं ॥ १ ॥

"दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः ।

लिम्पेत् कोष्णैरम्लपिष्टैः शूलाध्मानयुतोदरं ॥

हैमवती वचा । दारुषट्कलेपः ॥ २ ॥

"अभयारग्वधो धात्री दन्ती तिक्ता स्नुही त्रिवृत् ।

मुस्ता प्रत्येकमेतानि ग्राह्याणि पलमात्रया ॥

तानि संक्षुद्य सर्व्वाणि जलाढ़कयुगे पचेत् ।

तत्र तोयेऽष्टमं भागं कषायमवशेषयेत् ॥

निस्तुषं जैपालबीजानि नवानि पलमात्रया ।

तनुवस्त्रकृतान्येव तस्मिन् क्वाथे शनैः पचेत् ॥

ज्वालयेदनलं मन्दं यावत् क्वाथो घनो भवेत् ।

ततः खल्ले क्षिपेत् भागानष्टौ जैपालबीजतः ॥

भागांस्त्रीन् नागराह्वो च मरिचात् द्वौ च पारदात् ।

गन्धकात् द्वौ च तानीह यावद्यामं विमर्दयेत् ॥

रसो नाराचनामायं भक्षितो रक्तिकामितः ।

जलेन शीतलेनैव रोगानेतान् विनाशयेत् ॥

आध्मानं शूलमानाहं प्रत्याध्मानं तथैव च ।

उदावर्त्तं तथा गुल्ममुदराणि हरत्यसौ ।

वेगे शान्ते च भुञ्जीत शर्करासहितं दधि ।

ततस्तत्सैन्धवेनापि ततो दध्योदनं मनाक्" ॥

महानाराचो रसः ॥ ३ ॥ इति भावप्रकाशः ॥ (वायुना सवेदनमुदरपरिपूर्णत्वमाध्मानत्वं । इति हरिविनिश्चयग्रन्थव्याख्यानकृद्विजयरक्षितः ॥)

आध्मानी, स्त्री, (आङ् + ध्मा + ल्युट् + ङीप् ।) गन्धिकानामगन्धद्रव्यं । इति राजनिर्घण्टः ॥

आध्या, स्त्री, (आङ् + ध्यै + अङ् + टाप् ।) चिन्ता । स्मृतिः । इति शब्दरत्नावली ॥

आध्यात्मिकं, त्रि, (आत्मानमधिकृत्य भवं अधि + आत्मन् + ठञ् ।) दुःखविशेषः । यथा । दुःखानां त्रयं दुःखत्रयं तत् खल्वाध्यात्मिकं चाधिभौतिकं चाधिदैविकञ्च । तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च । शारीरं वातपित्तश्लेष्मणां निमित्तं । मानसं कामक्रोधलोभमोहेर्षाविषादविशेषादर्श-ननिबन्धनं । सर्व्वं चैतदान्तरोपायसाध्यत्वात् आ-ध्यात्मिकं दुःखं । इति साङ्ख्यतत्त्वकौमुदी ॥ (आत्मतत्त्वविषयकं । यथा, मनुः २ । ११७ ।

"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च ।

आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत्" ॥

आध्यानं, क्ली, (आङ् + ध्यै + ल्युट् ।) ध्यानं । चिन्ता । इत्यमरः ॥

आध्यापकः, पुं, (आ सम्यक् अध्यापयति यः इति अध्यापकः । स एव स्वार्थे अण् ।) अध्यापकः । इति शब्दरत्नावली ॥

आनः, पुं, (अन् + घञ्) उच्छ्वासः । वहिर्मुखश्वासः । इति हेमचन्द्रः ॥ (अन्तःस्थितस्य प्राणवायोर्नासि-कयोच्छ्वासः ।)

आनकः, पुं, (आङ् + अन् + ण्वुल्) पटहः । भेरी । मृदङ्गः । शब्दयुक्तमेघः । इति मेदिनी ॥ (यथा, भगवद्गीतायां १ । १३ ।

"ततः शङ्खाश्च भेर्य्यश्च पणवानकगोमुखाः" ।)

आनकदुन्दुभिः,पुं,(आनकाः दुन्दभयो देववाद्यविशेषाः यस्य जन्मनि । वसुदेवजन्मनि देवा दुन्दभिध्व-निञ्चक्रुः ।) वसुदेवः । इत्यमरः ॥ (कृष्णपिता । यथा—हरिवंशे ॥

"वसुदेवो महाबाहुः पूर्व्वमानकदुन्दुभिः ।

जज्ञे यस्य प्रसूतस्य दुन्दुभ्यः प्राणदन् दिवि ॥

आनकानां च संह्रादः सुमहानभवद्दिवि" ॥)

आनकदुन्दुभिः, पुं स्त्री, (आनकः प्रोत्साहको दुन्दु-भिः ।) बृहड्ढक्का । इत्यमरटीकायां भरतः ॥

आनतः, त्रि, (आङ् + नम् + क्तः ।) नतः । तत्-पर्य्यायः । अवाग्रः २ अवनतः ३ । इत्यमरः ॥ (अधोमुखः, विनतः, प्रणतः, विनयनम्रः । यथा, हरिवंशे ।

"शिरसाचोर्हि पादान् वै नमश्चक्रतुरानतौ" । महाभारते ।

"स कदाचित् मृगं विद्धा वाणेनानतपर्व्वणा" । मनुः ।

"रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत्" ।)

आनतिकरः, त्रि, (आनति + कृ + अच् ।) पारितो-